ॐ अस्य श्री आनन्देश्वरभैरवमन्त्रस्य कालाग्निरुद्रभैरवऋषयः सम्राड्छन्दः आनन्देश्वरभैरवदेवता श्रीं बीजं ह्रीं शक्तिः क्लीं कीलकं आत्मनो० ..... ऋष्यादिन्यासः ह्रामित्यङ्गानि० करन्यासः, प्राणायामं, ध्यानं, स्वस्वरूपं स्वमार्गस्थं स्वसंवेद्यं सुतेजसम् । स्वतन्त्रं स्वपदार्थं ढं(स्थं) भैरवं तं नमाम्यहम् ॥गायत्री॥ आनन्देश्वराय विद्महे । भैरवाधिपतये धीमहि । तन्न आनन्देश्वरः प्रचोदयात् ॥३॥ मूलं॥ ॐ जूं सः हसक्षमलवरयर्थं सः जूं ॐ, आनन्देश्वरभैरवाय वौषट् १०८ । मलां शिरसे स्वाहा, प्राणाय०, पूर्ववन्न्यासं तर्पणम्॥ ॐ अस्य श्री मंखाभिधा तरुष्कराजानकमन्त्रस्य ब्रह्माऋषिः गायत्रीछन्दः श्री तष्करदेवता जपे विनियोगः। मूलेनकरषडङ्गन्यासः। प्राणायामं, ध्यानं पात्रं वामेव हन्तं फलनिवहसितं स्वच्छवैदूर्यवर्णं, दण्डं दक्षेमहेमं निखिलभयहरं माधवी मूलसंस्थम् । नीले कर्पा(र्या)सकेशे सितवसनमथो कृष्ण

वासोदधानम् , प्रत्यग्वक्त्रं सुकेशं सुव्रततमज्व(जु)षं शङ्खराजं प्रपद्ये॥ मङ्खराजाय विद्महे वाद्यताय धीमहि तन्नो मङ्खराजा प्रचोदयात् ॥ मूलं– ॐ ह्रीं श्रीं मङ्खाभिधतुरुष्कराजाय नमः १०८ ।प्राणायामं न्यासं तर्पणम् ॥ ॐ अस्य श्री बहुखादकीश्वरमन्त्रस्य कालाग्निरुद्रऋषिः, त्रिष्टुप्छन्दः, बहुखादकीश्वरो देवता ॐ बीजं ह्रीं शक्तिः श्रीं कीलकं जपे विनियोगः । ऋष्यादिन्यासः, मूलेन करषडङ्गन्यासः, प्राणायामं, ध्यानं, ॐ प्रीतार्थढ(द)स्त्रिनेत्रोज्वलदलनरुचिः खड्गखट्वाङ्गकाद्या, दण्डं घण्टांस्त्रिशूलं डमरुमुभयवराभीतिहस्तैर्दधानः। सिंहत्वगुत्तरीयोधृतचषमहामुण्डमालो दयालुः, भीमोर्वाद्यो स्वद्योजायतुमवहुवुक्सिद्धिदो भैरवेन्दुः ॥ गायत्री । ॐ बहुखातकाय विद्महे खड्गहस्ताय धीमहि तन्नो भैरवः प्रचोदयात् ।३। ॐ ह्रीं श्रीं बहुखातकेश्वराय नमः १०८ । प्राणायामं पूर्ववन्न्यासं तर्पणम्॥ ॐ अस्य श्री राजराजेश्वरमन्त्रस्य

गन्धर्वऋषिः त्रिष्टुप्छन्दः श्रीराजराजेश्वरो देवता ॐ बीजं ह्रीं शक्तिः श्रीं कीलकं आत्मशोधनार्थं जप्ये(पे) विनियोगः । ऋष्यादिन्यासः, मूलेन करषडङ्गन्यासः, प्राणायामं, ध्यानं। मध्ये राष्ट्र(ष्ट्र)पतिं दशार्कवदनं शून्यैकबाहुं महा,पीठस्थं तिथिलोचनं नगपुरक्षेक्षादिसिद्धीश्वरम्। नानावर्णसुवर्णविग्रहरुचिं खड्गाङ्गकाद्याङ्कुश,पाशासिस्फुरमण्डस्थलडमरघंट्टा(ट्टा)करं चिन्तये ॥ मूलं ॐ ह्रीं श्रीं राजराजेश्वराय स्वाहा ।१०८। गायत्री । राजराजेश्वराय विद्महे पीठस्थाय धीमहि तन्नो राष्टे प्रचोदयात् ।३। प्राणायामं पूर्ववन्न्यासं तर्पणम्॥ ॐ अस्य श्री विश्वक्सेनम० महाराल ऋषिः त्रिष्टुप्छन्दः श्री विश्वक्सेनो देवता ॐ बीजं ह्रीं शक्तिः श्रीं कीलकं आत्म० जपे विनियोगः । ऋष्यादिन्यासः, मूलेन करषडङ्गन्यासः, प्राणायामं, गायत्री ।विश्वक्सेनाय विद्महे उपवीतधराय धीमहि तन्नो विश्वक्सेन प्रचोदयात् ।३। ध्यानं – द्विभुजं श्यामवदनं विष्णोरनुचरं नुमः । उपवीतधरं वन्दे विश्वक्सेनं जयप्रदम्॥ मूलं । ॐ ह्रीं श्रीं क्षां यूं क्षं श्वक्सेनभैरवाय नमः १०८॥

। मलां शिरसि, प्राणा०, पूर्ववन्न्यासः तर्पणम्॥ ॐ अस्य श्री हाटकेश्वरभैरवमन्त्रस्य कालाग्निरुद्रभैरवऋ(षयः) त्रि०(ष्टुप्छन्दः) श्रीहाटकेश्वरो देवता ॐ बीजं ह्रीं श०(क्तिः) श्रीं कीलकं आत्मनो० जप्ये(पे) वि०(नियोगः) । ऋष्यादिन्यासः, मूलेन करषडङ्गन्यासः, प्राणायामं, ध्यानं। चतुर्बाहुं महाकायं लम्बोष्टं सूकराननम् ।वज्रखट्वाङ्गहस्तं च ह्यटहासपरायणम् ॥ हाटकेश्वराय विद्महे भयापहाय धीमहि तन्नो हाटकेश्वरः प्रचोदयात् ॥ ३॥ मूलं । ॐ ऐं ह्रीं श्रीं हाटकेश्वराय वौषट् १०८॥ मालां शिरसि, प्राणा०, पूर्ववन्न्यासः गुह्येति तर्पणम्॥ ॐ अस्य श्रीपूर्णराजमन्त्रस्य भैरवऋषिः अनुष्टुप्छन्दः पूर्णराजभैरवो देवता ऐं बीजं ह्रीं शक्तिः जुं सः कीलकं आत्मनो० जप्ये(पे) विनियोगः । ऋष्यादिन्यासः, मूलेन करषडङ्गन्यासः, प्राणायामं, ध्यानं। द्विभुजं श्यामवदनमानन्दरसपूरितं। कल्पान्तमेघसदृशं पूर्णराजं नमाम्यहम्॥ गायत्री ।पूर्णराजाय विद्महे श्यामाकृतये धीमहि तन्नः पूर्णराजः प्रचोदयात् । मूलं । ॐ ऐं ह्रीं जुं सः पूर्णराजभैरवाय नमः १०८॥ मलां शि० प्राणायामं पूर्ववन्न्यासं तर्पणम् ॥ ॥

ॐ अस्य श्री मङ्गलेश्वरमन्त्रस्य सदाशिवऋषिः अनुष्टुप्छन्दः मङ्गलेश्वरो देवता ॐ बीजं ह्रीं शक्तिः श्रीं कीलकं आत्मनो० जूप्ये(पे) विनियोगः ऋष्यादिन्यासः मूलेन करषडङ्गन्यासः प्राणायामं ध्यानं ॐ कपालखट्वाङ्गधरस्त्रिलोचनश्चथाङ्कुशाहीन्दुधरस्त्रिलोचनः। चतुर्भुजो रक्ततनुर्हसन्दुर्योजीयादसौमङ्गलराजकोविभुः॥ गायत्री ह्रीं मङ्गलेश्वराय विनियोगः श्रीं मङ्गलराजानकाय स्वाहा १०८।प्राणा० पूर्ववन्न्यासः तर्पणम् ॥ ॐ अस्य श्री वैतालभैरवमन्त्रस्य ब्रह्माऋषिः जगतीछन्दः वेतालभैरवो देवता आत्मनो० जप्ये(पे) विनियोगः ऋष्यादिन्यासः ह्रामिति करषडङ्गन्यासः प्राणा० ध्यानं ज्वालाके मन्त्रिनेत्रं भुजगपतिमहाभीषणं मुण्डमालां देवीं कर्त्रीं कपालं डमरकसहितं नीलशूलं दधानं वीणावाद्यप्रवीणामुरसिविनिहितां वादयन्तु भुजाठ्यां वन्दे वेतालमुद्यद्दिनकरसदृशं नाट्यलग्नं हसन्तम् ॥ गायत्री॥ उलूकाक्षाय वि० खरकर्णाय धी० तन्नो वीतालः प्रचोदयात् ३।

मूलं। ॐह्रीं श्रीं वेतालभैरवाय नमः १०८ ॥मलां शिरशि प्राणा० तर्पणम् ॥ ॐ सूर्यमन्त्रस्य ब्रह्माऋषिः शतचिह्नऋषिवा गायत्रं छ(न्दः) त्रिष्टुप्छ(न्दः)वा ह्रां बी० ह्रीं श० सः की०। आत्मनो० जप्ये० ऋष्यादि ह्रामितिकरषडङ्गन्यासः प्राणा० ध्यानं प्रत्यक्षदेवं, भास्करायवि० ३। मूलं ॐ ह्रां ह्रीं सः सूर्यायनमः १०८ । मालां शिरसि प्राणा० पूर्ववन्न्यासं गुह्येति तर्पणम् उदयमस्तु तर्पणं वा॥ ॐ अस्य श्री चन्द्र म० ब्रह्माऋषिः त्रिष्टुप्छन्दः सोमो देवता ॐ बी० श्रीं शक्तिः क्रीं कीलकं आत्म० जप्ये विनियोगः ऋष्यादिन्यासः ह्रामिति करषडङ्गः, प्राणा०, ध्यानं, शङ्खप्रभुं। गः। निशाकराय वि० शीतरश्मये धीमहि तन्नः सोमः प्रचोदयात् ३। ॐ ह्रीं सः शीतांशाय नमः १०८। मालां शि० प्राणायामं पूर्ववन्न्यासं तर्पणम् ॥ ॐ अस्य श्री भौममन्त्रस्य अङ्गिराऋषिः गायत्रीछन्दः भौमो देवता ॐ बीजं श्रीं शक्तिः कं कीलकं आत्मने० जप्ये(पे) विनियोगः, ऋष्यादिन्यासः ह्रामिति करषडङ्गन्यासः प्रतप्तगाङ्गेय, गः, अङ्गारकाय विद्ममहे धरासुताय धीमहि तन्नो भौमः प्रचोदयात् ३। ॐ रहर्थं अङ्गकाराय नमः १०८. मालां शिरसि प्राणायामं पूर्ववन्न्यासः तर्पणम्॥

ॐ अस्य श्री बुधमन्त्रस्य ब्रह्माऋषिः त्रिष्टुप्छन्दः रोहिणीयो देवता आत्मनो० जाप्ये० ऋष्यादिन्यासः ह्रामिति करषडङ्गन्यासः प्राणायामं ध्यानं, सोमात्मणं, गाय० रोहिणीयाय विद्महे चन्द्रपुत्राय धीमहि तन्नो बुधः प्रचोदयात् ३॥ मूलं । ॐ ह्रीं बुधाय नमः १०८।मालां शिरसि प्राणायः पूर्ववन्न्यासः तर्पणम् ॥ अस्य श्री बृहस्पतीमन्त्रस्य गृत्समदऋषिः त्रिष्टुप्छन्दः बृहस्पतिदेवता आत्म० जाप्ये विनियोगः ऋष्यादि ह्रामिति करषडङ्गन्यासः प्राणा० ध्यानं, तेजोमयं। बृहस्पतये विनियोगः सुराचार्याय धीमहि तन्नो जीवः प्रचोदयात् ३। मूलं ॐ ह्रीं भोगास्पदाय नमः १०८॥मालां शिरसि प्राणायामं पूर्ववन्न्यासः तर्पणम् ।अस्य श्री शुक्रमन्त्रस्य कौञ्चाङ्गिरऋषिः त्रिष्टुप् बृहतीछन्दः शुक्रदेवता आत्मनो० जाप्ये विनियोगः॥ ऋष्यादिन्यासः ह्रामिति करषडङ्गन्यासः प्राणायामं ध्यानं सन्तप्तकाञ्च गाय० भार्गवाय विद्महे दैत्यगुरवे धीमहि तन्नः शुक्रः प्रचोदयात् ३। मूलं ॐ ह्रीं आसुरत्तमाय शुक्राय नमः१०८ । मालां शिरसि प्राणा०

पूर्ववन्न्यासं तर्पणम् । ॐ अस्य श्री शनिर्मन्त्रस्य कुत्सऋषिः गायत्रीछन्दः शनश्चरो देवता आत्म० जाप्ये विनियोगः ऋष्यादि करादिन्यासः प्राणा०,ध्यानं नीलाञ्ज०, शनश्चराय विद्महे छायासुताय धीमहि तन्नः सौरः प्रचोदयात् ३। ॐ ह्रीं कृष्णवर्णशनश्चराय नमः १०८। प्राणायामं पूर्ववन्न्यासःतर्पणम् ॥

ॐ अस्य श्री राहुमन्त्रस्य गौतमऋषिः गायत्रीछन्दः राहुदेवता आत्मनो० जाप्ये विनियोगः ऋष्यादिन्यासः ह्रामिति करषडङ्गन्यासः प्राणा० ध्यानं, शीतांशुमित्रान्तकं, गायत्री० सिंहिकेयाय विद्महे विधुन्तदाय धीमहि तन्नो राहुः प्रचोदयात् ३। मूलं ॐ ह्रीं अमृतप्रियाय नमः१०८ । मालां शिरसि प्राणायामं पूर्ववन्न्यासः तर्पणम् ॥ ॐ अस्य श्री केतुमन्त्रस्य अङ्गिराऋषिः गायत्रीछन्दः केतुर्देवता आत्मनो० जाप्ये विनियोगः ऋष्यादिन्यासः ह्रामिति करषडङ्गन्यासः ध्यानं लाङ्गूलयुक्तं । गायत्री० अग्निपुत्राय विद्महे पुच्छवते धीमहि तन्नः केतु प्रचोदयात् ३। मूलं ॐ ह्रीं ज्यौतिष्केतवे नमः १०८॥ मालां शिरसि प्राणायामं पूर्ववन्न्यासः तर्पणम् ॥ ॐ अस्य श्री वास्तुष्पतिमन्त्रस्य ब्रह्माऋषिः गायत्रीछन्दः वास्तुपुरुषदेवता आत्मनो० जाप्ये विनियोगः ऋष्यादिन्यासः ह्रामिति करषडङ्गन्यासः ॥ध्यानं इन्दुग्निसूर्यनयनां पाशाङ्गशधरां परां द्विभुजां सिंहमध्यस्थां भजेहं सभयङ्करीम् गायत्री । इन्दुग्निजप्ये विनियोगः पाकशासनाय पाशाङ्कशधराय धीमहि तन्नः अभयङ्करी प्रचोदयात् ३ । मूलं ॐ ह्रां ह्रीं सः अभयङ्कर्यै नमः १०८। माला शिरसि पूर्ववन्न्यासः तर्पणं॥ ॐ अस्य श्री अभयङ्करीस० श्रीशिवऋषिःगायत्रीछन्दः अभयङ्करी देवता ह्रां बीजं ह्रीं शक्तिः सः कीलकं आत्म० जपे विनियोगः ह्रामिति करषडङ्गः

ॐ अस्य श्री अभ(य)ङ्करीमन्त्रस्य शिवऋषिः अनुष्टुप्छन्दः श्री अभयङ्करीदे(वता) जाप्ये विनियोगः। ह्रामिति करषडङ्गः॥ प्राणायामं ध्यानं ।इन्दुग्निसूर्य०॥ शचीपतये विद्महे पाकशासनाय धीमहि तन्नो अभयङ्करी प्रचोदयात् ३। ॐ ह्रीं श्रीं अभयङ्कर्यै नमः ॐ ह्रीं अभयङ्कर्यै नमः वा १०८॥ मालां शिरसि प्राणायामं पूर्ववन्न्यासः गुह्येति तर्पणम् ॥ ॐ अस्य श्री अभङ्करीमन्त्रस्य भर्गो देवऋषिः बृहतीच्छन्दः इन्दो देवता जपे विनियोगः, मूलेन न्यासः। प्राणायामः॥ ध्यानं। इन्दुग्निसूर्य० ॥ शचीपतये वि० ३॥ ॐ मूलं ॐ यत इन्द्रभयामहे० १०८॥ प्राणा० पूर्ववन्न्यासःतर्पणम्॥ अथ योगिनी जपः॥ ॐ अस्य श्री मङ्गलाम० भैरवऋषिः गायत्रीछन्दः मङ्गलदेवता जपे विनियोगः, मूलेन करषडङ्गः॥प्राणायामः ध्यानं ॐ शुक्लां स्वरधरां देवीं शुभ्राभरणभूषिताम् सर्वमङ्गलदात्रीं तां मङ्गलां प्रणमास्यहम् ।गः।श्वेताश्वरायै वि० मङ्गलप्रदायै धीमहि तन्नो मङ्गलः प्रचोदयात् ३। ॐ ह्रीं मङ्गले मङ्गलालये स्वाहा १०८ । मालां शिरसि प्राणा० पूर्ववन्न्यासः अनेन मन्त्रेण मङ्गलादेवी प्रीतेस्तु ॥ ॥

ॐ अस्य श्री पिङ्गलामन्त्रस्य भैरवऋषिः त्रिष्टुप्छन्दः पिङ्गलादेवता जपे विनियोगः, मूलेन न्यासः प्राणायामः ध्यानं ॐ रक्ताक्षीरक्तवसनां रक्तमाल्यविभूषणाम् सूर्यवर्णप्रतीकाशयां पिङ्गला प्रचोदयात् ३ , मूलं, ह्यौं पिङ्गले वैरिवारिणि प्रदहट् १०८ । मालां शिरसि प्राणायामं । अनेन म० पिङ्गला प्रीतास्तु ॥ अस्य धन्यायोगिनीमन्त्रस्य महादेवऋषिः जगतीछन्दः धन्यादेवता जपे विनियोगः, मूलेन न्यासः प्राणा०। ध्यानं ॐ पीतास्वरधरां पीतां पीतस्रग्दामभूषितां सुरासुरनुतां देवीं धन्यां धनप्रदायिनीम् । गा०, प्रीताम्बरायै विनियोगः पीतवर्णायै धीमहि तन्नो धन्या प्रचोदयात् ३॥ मूलं, ह्रीं धनप्रदायै धन्यायै स्वाहा १०८। मालां शिरसि प्राणायामं । पूर्ववन्न्यासं। अने० धनप्रदा धन्या प्रीतोस्तु ॥ अस्य श्री भ्रामरीमन्त्रस्य भैरवऋषिः अनुष्टुप्छन्दः भ्रामरी देवता जपे विनियोगः मूलेन न्यासः प्राणायामः ध्यानं ॐ रक्तातिरक्तवसनां रक्तमाल्यविभूषितां भ्रामयन्तींतुलोकानां भ्रामरी प्रणमाम्यहम् । गा०। रक्तवर्णायै विद्महे रक्ताम्बरायै धीमहि तन्नो भ्रामरी प्रचोदयात् ३॥

ॐ मूलं ॐ भ्रामरि भ्रामय क्लीं १०८ मालां प्राणायामं अनेन० भ्रामरी प्रीतास्तु ॥॥ अस्य श्री भद्रिकामन्त्रस्य भैरवऋषिः त्रिष्टुप्छन्दः जपे विनियोगः। ऋष्यादि० प्राणा० मूलेन करषडङ्गः ॥ ध्यानं ॐ हरिणीं सौम्यवदनां हरिद्वस्त्रनुलेपनाम् परमां भद्रदां देवीं भद्रिकां प्रणमाम्यहम् ॥ गा० ।भद्रिकायै विनियोगः हरिद्वर्णायै धीमहि तन्नो भद्रिका प्रचोदयात् ३ । ॐ मूलं । ब्लूँ भद्रिके मम भद्रं देहि परमा भद्राणि नाशय -२ स्वाहा १०८ ।मालां, प्राणा०, पूर्ववन्न्यासः, अनेन मन्त्रेण भद्रिकादेवी प्रीतास्तु ॥ ॐ अस्य श्री उल्कामन्त्रस्य शिवऋषिः गायत्रीछन्दः उल्कादेवता जपे विनियोगः ऋष्यादिन्यासः प्राणायामं मूलेन करषडङ्गः। ध्यानं। शङ्खकुन्देन्दुधवलां शुक्लापुष्पावतेसिनीम् सर्वसिद्धिप्रदां देवीं सिद्धाख्यां प्रणमास्यहम्॥ गा०। सिद्धायै विनियोगः शुक्लाम्बरायै धीमहि तन्नो सिद्धा प्रचोदयात् ३।मूलं ।ह्रीं सिद्धे सर्वं मनुसोभीष्धं साधय-२ स्वाहा १०८। मा० प्राणा० न्यासं । अने० सिद्धा प्रीतास्तु॥ ॥ अस्य श्री संकटाम० भैरवऋषिः त्रिष्टुप्छन्दः सङ्कटादे जपे विनियोगः ऋष्यकरषडङ्गः मूलेन प्राणा० ध्यानं ।रक्ताङ्गारागरमनां रक्तमाल्यविभूषितां सुरासुरैस्तुतां देवीं संकटां प्रणमाम्यहम्॥ गायत्री ।संकटायै वि० रक्ताम्बरायै धीमहि तन्नः संकटः प्रचोदयात् ३, मूलं, स्हौं सङ्कटे रोगं परमं मे नाशय नाशय स्वाहा १०८ ॥ मालां शिरसि प्राणाया० पूर्ववन्न्यासः तर्पणं अनेन मन्त्रेण सङ्कटादेवी प्रायतां प्रातास्तु ॥ ॥ अस्य श्री सूर्यमन्त्रस्य शतर्चनऋषिः त्रिष्टुप्छन्दः सूर्यो देवता जपे विनियोगः । ह्रौं, अङ्गु० श्रीं तर्ज० श्तुं मध्य० ग्रहराजाय, अना०, आदित्याय, कनि०, स्वाहा, करत०, प्राणा०। ध्यानं बद्धपद्मासनो देवः प्रसन्नो जरादीश्वरः सप्ताश्वाः सप्तहस्ता च द्विभुजो पातु नो रविः॥गा०।भास्काय वि० ३। ह्रौं श्रीं आं ग्रहराजाय आदित्याय स्वाहा १०८। मालां, प्राणा०,पूर्ववन्न्यासः उदयमस्तु गुह्येति तर्पणम् ॥ अस्य० चन्द्रम० ब्रह्माऋषिः त्रिष्टुप्छन्दः चं० दे० जपे०। ॐ श्रीं, क्रीं,चं,चन्द्रमसे नमः।प्राणा० ।ध्यानं। दधिशङ्खतुषारांभक्षीरोधार्णवसम्भवं नमामि शशिनं देवं शुम्भोः मुक्तजभूषिणम् ।गा। निशाकराय ३। ॐ श्रीं क्रीं चं चन्द्रमसे नमः १०८ ।मालां ।प्राणा।पूर्ववन्न्यासः द्विजराजेति तर्पणम् ॥ ॥

अस्य० भौम० अङ्गिरऋ० गायत्रीछन्दः भौमो देवता जपे विनियोगः। ह्रौः आद्य, श्रीं तल, द्रां मध्य, कं अना०,ग्रहाधिपतये कनि० भौमाय नमः प्राणा०, ध्यानं। ॐ दाडिमे कुमम प्रख्यः शक्तिशुक्लगदाधरः, चतुर्भुजो मेषगामो वरदास्याद्रसार्मजः॥ अङ्गरकाय वि०॥३॥सू०। ह्रौः श्रीं द्रां कं ग्रहाधिपतये भौमाय नमः१०८॥ अङ्गनांत्रमांमः। मालां शि०।प्राणा० पूर्ववन्न्यासं। येनार्जितेति तर्पणम्॥ ॐ बुधम० ब्र०ऋ० त्रिष्टुप्छन्दः बुधो देवता जपे०। ॐ ह्रां क्रां टं ग्रहनाथाय, बुधाय स्वाहा॥ प्राणा०। ध्यानं। ॐ सिंहासनस्क्तो वरदः कर्णिकारममद्युतिः।खड्गचर्मरादापाणिः सौम्योनोस्तुवरप्रदः॥गोहिणीधाय वि० ३॥मूलं। ॐ ह्रां क्रौं टां ग्रहनाथाय बुधाय स्वाहा १०८॥ अङ्गमां१०।मालां शि० प्राणा० पूर्ववन्या०।

बुद्धो बुद्ध्योति तर्पणम्॥ ॐ अ०जीवम० गृत्समदऋ० त्रि०छ० बृहस्पति देवता जपे०। ॐ ह्रीं ह्य०, अ० श्रीं व्रीं तल० शिर० ऐं ग्लौं, शिखा० मध्य०, बीं०। ग्रहाधिपतये कव० अनासि०। श्रीं ठः कनि० नेत्रा० ऐंठः स्वाहा,अस्त्रा० कर०॥ प्राणा०। ध्यानं। ॐ दण्डाक्षिसूत्रधारी च कमण्डलधरस्तथा हस्यार्थढश्चतुर्वाहुः पातु नो वरदा सदा ॥ गा०। वाचस्पतये वि० ३॥मूलं। ॐ ह्रीं श्रीं बीजं ऐं ग्लौं ग्रहाधिपतये वी० श्रीं० ऐं स्वाहा १०८। अङ्गनां १०। मालां प्राणा०।पूर्ववन्न्या०।मेरुमूर्ध्नेति तर्पणम्॥

ॐ अस्य श्री शुक्रमन्त्रस्य क्रौञ्चाङ्गिरसऋषिः बृहतीश्छन्दः शुक्रो देवता। जपे०। मूलेन करषडङ्गन्यासः। प्राणा०। ध्यानं। श्वेतवर्णश्चर्तुर्बाहुः साक्षसूत्रकमण्डलः। दण्डधृद्धंसयानश्च भूयान्नः वरदः सितः॥ गा०। भार्गवाय विद्महे ३ ॥ मूलं। ॐ ऐं जं तल० ग्रीं मध्य, अना०, कनि० का० ग्रहेश्वराय शुक्रा नमः १०८। अङ्गनां १०॥ मालां शिरसि। प्राणा०। पूर्ववन्न्यासं सेमर्तुलेति तर्पणम्। ॐ अस्य श्री शनिमन्त्रस्य कुत्सऋषिः।गायत्रीछन्दः शनैश्चरो देवता जपे विनियोगः॥ मूले करषडङ्गन्यासः। प्राणायामं। ध्यानं। ॐ कर्णमाक्षसूरान्वीतो नरवाहःशस्त्रिलोचनः। दण्डाक्षमार्जयायुः कृष्णः कृष्णघनच्युतिः॥ गा०। शनैश्चराय विद्महे ३॥ मूलं। ॐ ह्रीं श्रीं ग्रहचक्रर्तिने शनैश्चराय क्लीं ऐं सः स्वाहा १०८। अङ्गनां १०॥ मालां शिरसि० प्राणायामः पूर्ववन्न्यासः।तर्पणं कृष्णवर्णेति॥ ॐ अस्य श्री राहुमन्त्रस्य गौतमऋषिः गायत्रीछन्दः राहुदेवता जपे विनियोगः॥ मूलेन करषडङ्गन्यासः। प्राणा०। ध्यानं॥ ॐ करालवदनः खड्गचर्मश्तूर्णीवरप्रदः नीलसिंहासनस्तुश्च राहुर्मेस्तुसुखावहः॥ गा। सैंहिकेयाय विद्महे० ३।मूलं। ॐ क्रीं क्रीं हूं हूं टङ्क धारिणे राहवे ह्रीं श्रीं भैं स्वाहा १०८। अङ्गना १०।मालां शिरसि०।प्राणायामः पूर्ववन्न्या०तर्पणं अग्निपुत्रेति॥

ॐ अस्य श्री केतुमन्त्रस्य अङ्गिरसऋषिः गायत्रीछन्दः केतुर्देवता जपे विनियोगः। मूलेन करषडङ्गन्यासः प्राणायामः। ध्यानं । ॐ धूम्रद्विबाहुः शूर्णीम शक्तिहस्तो घनश्छविः गृद्धयानासनसूश्च केतुः पायार्द्रहाधिपः॥गा।अग्निपुत्रायवि० ३॥मूलं। ॐ ह्रीं क्रूं क्रूरतुपिणे केतवे ऐंसौः स्वाहा १०८। अङ्गनां १०॥ मालां शिरसि प्राणायामः पूर्ववन्न्यासः । तर्पणं।अग्निपुत्रेति अनेन मन्त्रेण॥ ॥ अथ ग्रहाद्वितीयप्रकारेण जपः॥ ॐ अस्य श्री सूर्यमन्त्रस्य शतर्चनऋषिः त्रिष्टुप्छन्दः सूर्यो देवता जपे विनियोगः॥ ॐ आं अङ्गू० ई तल० ऊं सध्य ऐं अनः औं कनि० अः कर०॥ प्राणा०। ध्यानं। ॐ धूम्रध्वजं जपमालां रश्मिपुञ्चकरद्वये, बहन्सप्तश्वराः सूर्योरक्तस्त्रिक्षोबतात्सनः॥गः।भास्कराय विद्महे० ३॥ मूलं। ॐ ह्रां ह्रीं सः वीरेश्वरभैरवाय नमः १०८॥ मालां प्राणा० पूर्ववन्न्या० गुह्येति त० ॥१॥ ॐ चन्द्रमन्त्रस्य ब्रह्मऋषिः त्रिष्टुप्छन्दः चंद्रदेवता जपे०। कां कीं कूं कैं कौं कः। करषडङ्गः।प्राणा०।ध्या०। कमण्डलाक्ष स्रग्युतो मधुरवरवाहनः रक्तस्त्रिलोचनः स्रग्वीकुजोध्यान्नोमहीमतः॥ गः। निशाकराय वि० ३॥ मूलं। ॐ ह्स्रीं सः शीतांशवे नमः१०८। मा० प्रा० न्या० तर्पणं॥

ॐ भौमम० अङ्गिरऋ० गाछ० भौमो दे० जपे वि० । चां ची चूं चैं चौं चः करषडगः। प्राणा० ध्या० कमण्डलस्रग्युक्तो मयूरवरवाहनः रक्तस्त्रिलोचनः स्रग्बी कुजो व्यान्नो महीसुतः ॥ गा० अङ्गारकाय वि० ३॥ मू० ॐ ह्रूं अङ्गारकाय नमः १०८। मालां प्राणा० तर्पणं॥ ॐ वुधम० ब्र०ऋ० त्रि० छ० वु० दे० जपे ०॥ टां टीं टूं टैं टौं टः करषडङ्गः। प्राणा० ध्या० ॐ गरुडासनसंस्थोसौ साक्षिसूत्रकमण्डलः। किरीटहारभूषाढ्यो वुधोव्यान्नस्त्रि(लो)चनः। गा० रोहिणीयाय वि० ३॥ मू० ॐ ह्रीं वुधाय नमः१०८ । मालां प्राणा० तर्पणं॥ ॐ जीवम० ब्र०ऋ० त्रि० छ० वृहस्पतिदे० ज० वि०॥ तां तीं तूं तैं तौं तः। करषडङ्गः प्रा० ध्या० । त्र्यक्षःकमण्डलधरो गजस्थोक्षस्रगन्वितः। विद्यायुक्तो हि जीबोसौ मायान्नः कुमुदश्छविः । वाचस्पतये वि० ३॥ मूलं ॐ ह्रीं भोगास्पदाय नमः १०८ मालां शि० प्राणा० पूर्ववन्न्या० गुह्येति तर्पणम् ॥ ॐ शुक्रम० ब्रह्मा० बृहती० शुक्रो० ज० वि० ॥ पां पीं पूं पैं पौं पः करषडङ्गः प्राणा० ध्या० काव्योक्षकलशोपीतः त्र्यक्षोहा पीतवर्णकः विधिपुस्तकहस्ते वा कुचिद्रष्टो महागमे॥ गा० भार्गवाय वि० ३। ह्रीं असुरोत्तमाय नमः १०८ ॥ मालां शि० प्राणा० ध्या० पूर्ववन्न्या० गुह्येति तर्पणम् ॥

ॐऋष्यादि० न्यासः ॐ ह्रां सर्वज्ञाता अङ्गु० ह्० ॐ ह्रीं तृप्तिः तर्ज० शिर० ॐ ह्रूं अनाचिरोध मध्य० शि० ॐ ह्रैं स्वतन्त्र अनामि० कवचाय ह्रूं ॐ ह्रौं अलुप्तनेत्रेभ्यो कनिष्ठ० वौषट् ॐ ह्रः अनन्तशक्तये करतल० अस्त्राय फट्॥ प्राणायामः, ध्यानं, कर्पूर गौरं। गायत्री, ॐ पार्थिवेश्वराय वि० प्रपन्नपरिजातायधी० तन्नः पार्थिवेश्वरः प्र०२ । मूलं । ॐ ह्रां ह्रीं जूं सः नमः शिवाय प्रपन्नपरिजाताय नमः १०८ मालां शि० प्राणा० पूर्ववन्न्या० गुह्येति तर्पणम्॥ ॥ ॐ यगु इषु इति मन्त्रस्य आत्रेयऋषिः विराड्छन्दः यात परमात्मादेवता आत्म० दुर्भिक्षनिवृत्तये जपे० ऋष्यादि० मूलेन करषडङ्गः। ध्यानं, ॐ ध्यायेद्देवं सस्मितं स्यन्दनस्थं देव्यासार्बं तेजसादीप्तमानं इष्वासनालङ्कृताभ्यां कराभ्यां श्तराकार स्तूयमानं सुरोघैः। गायत्री। तत्पुरुषाय वि० २। मूलं। ॐ यात इषुशिवतमा प्राणा० न्या० तर्पणम्॥ सारीशान्तये गुवागोधूमतिल तण्डुल नारिकेल घृताग्नि होत्रिकाभिः होमः॥

ॐ अस्य श्री यासिस्वं गिरिशन्त० शिवेन वचसा त्वति मन्त्रद्वयजपस्य श्री गौतमऋ० निवृदनुष्टुप्छन्दः अनुग्रहतकर्ता श्रीमहारुद्रो देवता आत्मनो० श्रीमहारुद्रो देवता सन्तोषणार्थं अभीष्टसिद्ध्यर्थे मन्त्रद्वयजपे वि० नमः शिवेति षडङ्गः न ईशानमूर्धेति न्यासः। प्राणाया०, ध्यानं, सङ्गामिकेन वमुषा प्रविराजमानं मागच्छदुग्रशनिचण्डुहासम् दैत्यान्दिधक्षुमचलेश्वरचापपाणिं ध्यायेत्मुरारिसमरौघरवाधिर्थद्रम्॥ गायत्री, तत्पुरुषाय वि०२। मूलं। ॐ यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे शिवां गिरित्रतां कुरु मा हिंसी पुरुषञ्जगत्। शिवेन वचसात्वा गिरिशाच्छावदामसि यथानः सर्वमिज्जगदयक्ष्मसुमना असत् ।१०८। मालां शिर० प्राणा० पूर्ववन्न्या० तर्पणम्॥ ॥ॐ अस्य श्री द्वादशाक्षरविद्याम० श्रीभगवान्वेद व्यास ऋ० वा, ब्रह्माऋ०। अनुष्टुप्छन्दः, वा, गायत्रं छ० श्रीविष्णुः परमात्मा वासुदेवो देवता जपे विनियोगः॥ श्वेतैः शङ्ख गदा चक्रसहितैः सव्यैत्भुजैरङ्कितं वामैः पुस्तकदर्पणौ च नलिनी कुम्भं च श सदाराजन्तं गरुडाधिरूढमधिकं भक्तानुकम्पास्पदं लक्ष्म्यार्चाङ्कितमध्य नौमि वरदं श्रीवामुदेवं विभूम्॥

ॐ गायत्री । वासुदेवाय विद्महे लक्ष्मीनारायणाय धीमहि तन्नो विष्णुः प्रचोदयात् २ । ॐ नमो नारायणाय पुरुषाय महात्मने विशुद्धसत्यधिज्ञाय महाहंसाय धीमहि ।२॥ मूलं ॐ नमो भगवते वासुदेवाय १०८। मालां शिरसि प्राणायामः पूर्ववन्न्यासं तर्पणं अनेन मन्त्रेण देवगातु० ॥ ॐ अस्य श्री शिवाभगवतीमन्त्रस्य ब्रह्माऋषिः गायत्रीछन्दः श्रीशिवाभगवते देवता आत्मनो० जपे विनियोगः। ऋष्यादिन्यासः ॐ ह्रीं हृदयाय नमः श्रीं शिरसे स्वाहा ह्रीं शिखायै वषट् शिवा कवचाय हुम् भगवत्यै नेत्रायाभ्यां वौषट् नमः अस्त्राय फट् । एवं करन्यासः। प्राणा० ध्यानं ॐ देवीं श्रृगालवदनामरुणां त्रिनेत्रामेकाननां वसुभुजे मसिशूलहस्ताम् रावाङ्कसौ धृतकपालसकिङ्किणीकां खजाङ्गपुस्तकधरां शवगां नमामि॥ गायत्री। ॐ शिवाभगवत्यै विद्महे द्वादशाक्षर्यै धीमहि तन्नः शिवा प्रचोदयात् २॥ ॐ ह्रीं श्रीं ह्रीं शिवाभगवत्यै नमः१०८। मालां प्राणा० न्यासं। गुह्येति तर्पणं ॥ ॥ ॐ अस्य श्री शारदामन्त्रस्य भैरवऋषिः अनुष्टुप्छन्दः शारदाभगवती देवता क्लीं वीजं ह्रीं शक्तिः नमः कीलकं आत्मनो० जपे विनियोगः। ऋष्यादि० मूलेन करषडङ्गः।

प्राणाया० ध्यानं ॐ श्री श्रीशैलेस्थिताय प्रहसितवदना पर्वतीशूलहस्ता वह्निसूर्येन्दुनेत्रा त्रिभुवनजननीषड्भुजा सर्वशक्तिः शारदा शंकरोतु॥ गायत्री । श्रीशारदायै विद्महे सप्तादशाक्षर्यै धीमहि तन्नः शारदा प्रचोदयात् २। मूलं ॐ ह्रीं क्लीं सौः नमो भगवत्यै शारदायै ह्रीं स्वाहा १०८ मालां शिरसि प्राणा० पूर्ववन्न्यासं गुह्येति अनेन म० ॥ ॐ अस्य श्री लक्ष्मीनृसिंहमन्त्रस्य ब्रह्माऋषिः अनुष्टुपछन्दः श्रीलक्ष्मीनृसिंहो देवता क्ष्रों बीजं रौं शक्तिः प्रौं कीलकं आत्मनो० मम सर्वदोषाणां चौरव्याघ्रपन्नगवृश्चिकभूतप्रीतपिशाचशाकिनीडाकिनीयक्षिणीगृद्धोलूककगरलमहामारीणां अनेकविधपापोभयनिवारणार्थे श्रीनृसिंहमन्त्रविद्या

जपे विनियोगः। ऋष्यादि०। क्रों अङ्गु० प्रौं तर्ज० ह्रौं मध्य० रौं अना० ब्रौं कनि० ऐं करतल०। एवं षडङ्गः॥ प्राणा० ध्यानं, ॐ सत्यं ज्ञानसुखस्वरूपमसलं, क्षीराब्धिमध्येस्थितं, योगारूढमतिप्रसन्नवदनं, भूषासस्नन्मण्डलम्, त्यक्षं चक्रपिनाकसाभयधरा, विभ्राणकत्मश्छवी, श्छत्रीभूतफलीन्द्रमिन्दुधवलं लक्ष्मीनृसिंहं भजे॥

गायत्री। ॐ लक्ष्मीनृसिंहाय विद्महे दैत्यमर्दनाय धीमहि तन्नो नृसिंहः प्रचोदयात् २॥ मूलं॥ ॐ क्ष्रौं प्रौं ह्रौं रौं ब्रौं ऋौं नमः १०८॥ मालां प्राणा० पूर्ववन्न्या० गुह्येति तर्पणं॥ ॥ ॐ अस्य श्री अन्नपूर्णामन्त्रस्य ब्रह्माऋषिः गायत्रीछन्दःश्रीअन्नपूर्णादेवता जपे विनियोगः ऋष्यादिन्या० मूलेन करषडङ्गः। प्राणा० ध्यानं ॐ रक्तां विचित्रवसनां नवचन्द्रचूडां मन्नप्रदाननिरतां स्तमभारनघ्राम् निर्निकुमिन्दुशकलाभरणां विशालां हृष्टां भजे भगवतीं भवदुःखहन्त्रीम्॥ गायत्री, अन्नप्रदायै विद्महे प्राणवर्धनायै धीमहि तन्नो अन्नपूर्णा प्रचोदयात् २॥ ॐ नमो भगवतिमहेश्वरि अन्नपूर्णे अन्नं देहि २ स्वाहा १०८ मालां शि० प्राणा० पूर्ववन्न्यासं गुह्येति तर्पणम्॥ ॥ ॐ अस्य श्री अमृतेश्वरमन्त्रस्य नन्दिरुद्रचतुर्मुखऋषिः पंक्तिश्छन्दः अमृतीश्वरो देवता जूं बीजं सः शक्तिः ॐ कीलकं जपे विनियोगः। ऋष्यादिन्यासः॥

ॐ ह्० अङ्गु० जूं शि० तर्ज० सः शि० मध्य० ॐ क० अना० जूं ने० कनि० सः अस्त्रा० करतल०॥ प्राणायामः ध्यानं। देवं तामरसासनं शशिकलालङ्कारमङ्कारसश्छङ्खस्भोजवराभयोद्यूतकरालक्ष्म्यासमुद्वीक्षितम् सव्यासव्याकदोवराभयसुधाकुम्भेन्दुमिन्द्रप्रभूं सौम्यास्यं च चतुर्भुजं च भगवन्नेत्रं स्तुमः॥ गायत्री। ॐ जूं सः अमृतीशाय विद्महे व्योमदेहाय धीमहि तन्नो नेत्रः प्रचोदयात् २॥ मूलं ॐ जूं सः अमृतीश्वराय नमः १०८। मालां शि० प्राणा० पूर्ववन्न्यासं गुह्येति तर्पणम् ॥ ॐ अस्य श्री अमृतलक्ष्मीमन्त्रस्य नन्दिरुद्रऋषिः पंक्तिःछन्दः ॐ बीजं जूं शक्तिः सः कीलकं आत्मनो० जपे विनियोगः ऋष्यादिन्या०॥ ॐ ह्० अङ्गु० जूं शि० तर्ज० सःशिखा० मध्य० ॐ अना० जूं कनि० सः करतल०॥ प्राणायामः। ध्यानं ॥ पूर्णेन्दुवदनामिन्दु मुकुटाममृतीश्वरीम् त्रिनेत्राममृतेशाङ्कगतां तद्रूपिणीं भजे ॥ गाय०। ॐ तत्पुरुषायै विद्महे अमृतेशाङ्कगतायै धीमहि तन्नः अमृतलक्ष्मी प्रचोदयात् २॥ मूलं॥ ॐ जूं सः अमृतलक्ष्म्यै नमः १०८॥ मालां शि० प्राणा० न्यासं तर्पणं॥ ॐ अस्य श्री महाकालमन्त्रस्य भैरवऋषिः विराड्छन्दः महाकालो देवता हूं बीजं ह्रीं शक्तिः स्वाहा कीलकं आत्मनो० जपे विनियोगः ऋष्यादिन्या०, हामिति करषडङ्गन्या० सः।

प्राणायामः, ध्यानं , ॐ श्रीमच्चन्द्रकलावतं समुकुटां ज्वाला परीताननं शङ्खसिगदा धरं त्रिनयनं ब्रह्मादिदेवैस्तुतम् देवीं तूर्यदलोस्थितां भगवतीं श्यामां स्मरन्तं सदा(हृदा) ध्यायैद्भैरवनाथमग्निसद्यशं देवं महाकालकम्॥ गायत्री। ॐ महाकालाय विद्महे पाशहस्ताय धीमहि तन्नो अन्तकः प्रचोदयात् २॥ मूलं ।हूं हूं महाकालप्रसीद २ ह्रीं ह्रीं स्वाहा १०८॥ मालां शि० प्राणा० न्यासं। गुह्येति तर्पणम् ॥ ॥ ॐ अस्य श्री महाकालीमन्त्रस्य भैरवऋषिः विराड्छन्दः श्रीमहाकाली देवता ह्रीं बीजं श्रीं शक्तिः क्लीं कीलकं आत्मनो० जपे विनियोगः॥ ऋष्यादिन्या०। ह्रीं अङ्गु० श्रीं तर्ज० क्लीं मध्य० ह्रीं अना० श्रीं कनि० क्लीं करतल०॥ प्राणायामः। ध्यानं। पाशाङ्कुशधरां रौद्रीं शरचापकरोद्याम् मोहनं शोषणं चैव द्रावणं क्लेदनं तथा मारणं पञ्च इत्यनांबाणान्हस्तेन विभ्रतीं त्रिकोणमध्यगां लालाक्षारुणां देवीं नमास्यहम् ॥ गायत्री॥ महाकाल्यै विद्महे कालपत्न्यै धीमहि तन्नो महाकाली प्रचोदयात् २॥ मूलं। ॐ ह्रीं श्रीं क्लीं वैश्वानर्यै नमः १०८॥मालां शि० प्राणा० पूर्ववन्न्यासं गुह्येति तर्पणम्॥

ॐ अस्य श्री वटुकभैरवमन्त्रस्य बृहदारकऋषिः अनुष्टुप्छन्दः श्रीबटुकभैरवो देवता ह्रीं बीजं बटुकायेतिशक्तिः ॐकीलकं आत्मनो० जपे विनियोगः। ऋष्यादिन्या०। ॐ ह्रां वां अङ्गु० ह्० ह्रीं वीं शि० तर्ज० हूं वूं शि० मध्य० हैं वौं क० अना० ह्रौं वौं ने० कनि० ह्रः वः अस्त्रा० कर०॥ प्राणायामं ध्यानं ॐ नृत्यन्तं भुजयुगलेन दन्त तालं पञ्चास्यं दहन पतङ्ग पिङ्गभासं सत्पात्रं ध्वज वरचर्म खड्ग हस्तं वीरेशं वटुकमभीष्टदं प्रपद्ये॥ द्वस्थैदेव्यष्टभिः साङ्गैः पद्मप्रीतासनैर्वृतम् पञ्चवक्त्रं सदेवीकं वटुकं तं नमास्याहम् ॥गा०॥ ॐ वटुकनाथाय विद्महे आपदुद्धरणाय धीमहि तन्नो वटुकनाथः प्रचोदयात् २॥ मूलं ॐ ह्रीं वटुकाय आपदुद्धारणाय कुरु कुरु वटुकाय ह्रीं १०८॥ मालां शिरसि। प्राणायामः पूर्ववन्न्यासं ॥गुह्येति तर्पणम् ॥ ॥ ॐ अस्य श्री बहुरूपभैरवमन्त्रस्य कालाग्निरुद्रऋषिः अनुष्टुप्छन्दः बहुरूपभैरवो देवता ॐ बीजं हूं शक्तिः कुरु २ कीलकं आत्मनो० जपे विनियोगः॥ ऋष्यादिन्या० , ह्रां इति करषडङ्गः। प्राणाया० ध्यानं। ॐ श्वेतङ्गश्चिपिटनसस्त्रिनेत्र उग्रो बभ्रूवुः ललितकचः करालदंष्ट्रः। प्रीतस्थः पितृवर भैरवसहायैबाहुजो जयति नृमांसमश्नवानः॥

ॐ बहुरूपाय विद्महे कोटराक्षाय धीमहि तन्नो बहुरूपः प्रचोदयात् २॥ मूलं ॐ हसरक्षमलवयरूं बहुरूपभैरवाय नमः १०८॥ प्राणा० पूर्ववन्न्या०, गुह्येति तर्पणम् ॥ ॥ ॐ ह्रीं मायादेव्यै वौषट् स्वाहा १०८॥ ऋष्यादि तर्पणान्तं पूर्ववत्॥ ॐ अस्य श्री अघोरमन्त्रस्य कालाग्निरुद्रऋषिः अनुष्टुप्छन्दः श्रीअघोरमूर्तिः परमादेवता ॐबीजं हूं शक्तिः कुरु कुरु कीलकं आत्मनो जपे विनियोगः। ऋष्यादि० ॐ सर्वज्ञाता ह्० तृप्तिः शिर० अनादिबोध शिखा० स्वतन्त्र कव० अलुप्तनेत्येभेयो वौषट् फः अनन्तशक्तये अस्त्राय०। एवं करन्या०। प्राणा० ध्यानम्। त्रिपञ्चनयनं देवमिति॥बहुरूपाय विद्महे कोटराक्षाय धीमहि तन्नो घोरः प्रचोदयात् २॥मूलं। ॐ हूं अघोरेभ्योथ घोरेभ्योघोरघोरतरेभ्यश्च सर्वतः शर्वसर्वेभ्यो नमस्ते रुद्ररूपेभ्यो हूं नमः१०८॥ प्राणा० मालां शि० पूर्ववन्न्या० गुह्येति तर्पणम्॥ ॥ ॐ अस्य श्री अघोश्वरीमन्त्रस्य कालाग्निरुद्रऋषिः अनुष्टुप्छन्दः अघोश्वरीदेवता ह्रीं बीजं हूं शक्तिः ॐ कीलकं आत्मनो० जपे विनियोगः। ऋष्यादि० ॐ सर्वज्ञातादिना करषडङ्गः। प्राणा० ध्यानं। नौम्य हंतां परंब्रह्म महिषींचिद्व रूपिणीं ब्रह्मादिकरणातीतां परानन्दमयीं शिवाम्। ॐ परात्मिकायै विद्महे चिद्य रूपिण्यै धीमहि तन्नः शक्तिः प्रचोदयात् २॥

ॐ मूलं। ॐ ह्रीं अघोरीश्वरि हूं फट् अघोरीश्वर्यै नमः १०८॥मालां शिरसि प्राणायामः पूर्ववन्न्यासं। गुह्येति तर्पणम् अनेनम०॥॥ ॥ ॐ अस्य श्री बलामन्त्रस्य दक्षिणमूर्तऋषिः पंक्तिश्छन्दः श्रीबालादेवता ऐं बीजं क्लीं शक्तिः सौः कीलकं आत्मनो० जपे० ॐ ऋष्यादिन्यासः ॐऐं ह्० अङ्गु० क्लीं शि० तर्ज० सौः शि० मध्य० ऐं कव० अना० क्लीं नेत्र० कनि० सौः अस्त्र० करत०॥ प्राणा०।ध्यानम् ॐ अरुणाकिरणजालैः रञ्जिताशावकाशाः विधृतजपटीका पुस्तकाभीतिहस्ता । इतरवरकराद्या फुल्लकल्हारहस्ता निवसतुहृदिबाला नित्यकल्याणरूपा॥ ॐ ऐं बालायै विद्महे क्लीं कामेश्वर्यै धीमहि तन्नो बाला प्रचोदयात् २॥ मूलं । ॐ ऐं क्लीं सौः बालायैनमः १०८। मालां०, प्राणा०, न्यासं गुह्येति तर्प०॥ ॐ अस्य श्री बालात्रिपुरभैरवीमन्त्रस्य दक्षिणमूर्तिऋषिः पंक्तिश्छन्दः श्रीत्रिपुरभैरवी देवता, ऐं बीजं क्लीं श० सौः की० आत्मनो० जपे० ऋष्यादि० ऐं अङ्गु० क्लीं तर्ज० सौः मध्य० ऐं अना० क्लीं कनि० सौः करत०। प्राणा०। ध्यानं। गणेशबटुकस्तुता रतिसहायकामान्विता स्मरारिवरविष्टरा कुसुमबाणबाणैर्युता । अनङ्गकुसमादिभिः परिवृता च सिद्धैस्त्रिभिः कदम्बवनमध्यगा त्रिपुसुन्दरी पातुनः॥

गायत्री। ऐं बालात्रिपुरभैरव्यै विद्महे क्लीं कामेश्वर्यै धीमहि तन्नो बालात्रिपुरभैरवी प्रचोदयात् २ ॥ मूलं। ॐ ऐं क्लीं सौः बाला त्रिपुरभैरव्यम्बा पादकाभ्यो नमः ॥ मालां प्राणाया० पूर्ववन्न्यासं। गुह्येति तर्पणम् अनेनम०॥ ॥ ॐ अथ षोडशी । ॐ अस्य श्री विद्याषोडशी भगवती मन्त्रस्य दक्षिणमूर्तिऋषिः पंक्तिश्छन्दः श्रीविद्याषोडशी देवता ऐं बी० क्लीं श० सौः की० आत्मनो० जपे० ऋष्यादिन्यासः। ऐं क्ली सौः इति करषडङ्गन्यासः।प्राणा० ध्यानम्। ॐ त्र्यर्णात्र्यश्र निविष्टमूर्तिरधिका मुद्रात्रियोद्भासिता यार्धर्तङ्कशमा पाशबाणनिचयैश्चापं चतुर्भिः भुजैः देवीभिस्तिसृभिस्तथाष्टभिरथोदिग्दिग्दिग्भ्यनुक्ष्यादिभिर्वस्वष्ट प्रसिचाभिरष्टभिरथोजी याज्जगन्मातृका॥ गायत्री। ऐं क्लीं सौः बालात्रिपुरसुन्दर्यै विद्महे क्लीं कामेश्वर्यै धीमहि तन्नः श्रीविद्या प्रचोदयात् २॥ मूलं। श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं क ई जा ल ह्रीं हसकहल ह्रीं सकल ह्रीं सौः ऐं क्लीं ह्रीं श्रीं ॥१०८।मालां शिरसि० प्राणायामं पूर्ववन्न्यासं गुह्येति तर्पणम् अनेन मन्त्र०॥ ॥

ॐ अस्य श्री कामेश्वरमन्त्रस्य दक्षिणमूर्तिऋषिः पंक्तिश्छन्दः कामेश्वरो देवता श्रीं बीजं ह्रीं श० क्लीं कील० आत्मनो० जपे०॥ऋष्यादिन्या०।अथ करादिन्या०। ॐ ह्रीं श्रीं क्लीं हृद० अङ्गु० ॐ शिर० तर्ज० ॐ शिखा० मध्य० ॐकव० अना० ॐ नेत्र० कनि० ॐ अस्त्रा० करतल०॥ प्राणा० ध्यानं । ॐ चन्द्रकोटिप्रतीकाशं चन्द्रर्धकृतशेखरम् कोटिसमप्रभं। बराभयत्रिशूलासिकरं कामेश्वरं भजे ॥ गायत्री ॐ कामेश्वराय विद्महे वागेशाय धीमहि तन्नः कामेश्वरः प्रचोदयात् २॥ ॐ ऐं क्लीं सौः ॐह्रीं श्रीं हमरक्षमलवयर्थं सहरक्षमलवयर्थं वरलक्षमलवयर्थं ॐ ह्रीं श्रीं ॐ सौः क्लीं ऐं कामेश्वराय नमः ॥१०८॥मालां प्राणा० पूर्ववन्न्यासं गुह्येति तर्पणम् अनेन मन्त्रेण ॥ ॐ ह्रीं श्रीं क्लीं अं कामेश्वरभैरवनाथपादकाभ्यो नमः १०८। द्वितीय मन्त्रः॥ ॐ अस्य श्री भुवनीश्वरीमन्त्रस्य रुद्रऋषिः पंक्तिश्छन्दः भुवनेश्वरी देवता ह्रीं बी० श्रीं शक्तिः क्लीं कीलकं आत्मनो० जपे विनियोगः॥ ऋष्यादिन्या० । ॐ ह्रीं श्रीं क्लीं अङ्गुष्ठादि न्यासः। प्राणाया० ।ध्यानं। ॐ उद्यदिनद्युतिमिन्दुकिरीटां तुङ्गकुचां नयनत्रियुक्तां स्मेरमुखीं वरदाङ्कु पाशमभीतिकरां प्रभुजे भुवनीशीम्॥

गायत्री। सुभगायै विद्महे कामदुघायै धीमहि तन्नो भुवनेश्वरी प्रचोदयात् २॥ मूलं। ॐ ह्रीं श्रीं क्लीं भुवनीश्वर्यै नमः१०८। मालां, प्राणा०, पूर्ववन्न्या० गुह्येति तर्पणम् ॥ ॐ अस्य श्री भद्रकालीमन्त्रस्य च्यवनऋषिः अनुष्टुप्छन्दः श्रीभद्रकाली देवता भैं बी० फूं श० स्वां की० आत्मनो जपे०॥ ऋष्यादि। ॐ क्रीं २ हूं २ हृ० अङ्गु० ह्रीं २ शिर० तर्ज० भैं भद्रकालि शिखा० मध्य० भैं ह्रीं २ कव० अना० हूं २ नेत्र० कनि० क्रीं क्रीं क्रीं अस्त्रा० करत०॥ प्राणायामः। ध्यानं ॐ शमांशममुखीं विलोलवपुषां व्याकोटिराक्षीं शिवां विशंद्वि रूपि स्तरणीं भगवतीं मन्त्रां चरकुंबरम् ब्रह्मामण्डु शिवास्थिबद्धरसनां ..... प्रेतस्थां हृदयाम्भुजे भगवतीं भैं भद्रकालीं भजे ॥ गायत्री। भैं भद्रकाल्यै विद्महे श्मशानवासिन्यै धीमहि तन्नो भद्रकाली प्रचोदयात् २॥मूलं । ॐ क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं भैं भद्रकालि ह्रीं ह्रीं हूं हूं क्रीं क्रीं क्रीं स्वाहा १०८॥ मालां० प्राणा० न्यासं।तर्पणं॥ ॐ अस्य श्री चामुण्डा भगवतीमन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः गायत्री उष्णिक् अनुष्टुप् छन्दांसि महाकाली महासरस्वती देवता महालक्ष्मीदेवता नन्दा शाम्भरी भीमाः शक्तयः रक्तदन्तिका दुर्गा भ्रामर्यो बीजानि , अग्निवायुः सूर्यस्तत्वानि ।

आत्मनो० आत्मनः सकलाभीष्टाप्ति पूर्वकाशेषभयसमवैहिकामुत्रिकाक्षय शुभफल प्राप्त्यर्थं श्रीदुर्गाया नवार्णजपविधाने विनियोगः॥ब्र० वि० म० ऋषिभ्यः नमः शिर, गा० उ०अनु० छन्दोभ्यो नमः मुखे। श्रीमहाकाली महासरस्वती महालक्ष्मी देवतायै नमः हृदि, नन्दा शाकम्भरी भीमा शक्तिभ्योनमः दक्षमुनौ रक्तदन्तिका दुर्गा भ्रमर्योबीजानि वामस्तनौ। अग्निर्वायुः सूर्यस्तत्वानि नमो हृदि। श्रीमहाकाली महालक्ष्मी महासरस्वती प्रीत्यर्थं जपे विनियोगः सर्वाङ्गेषु॥अथकरन्यासः। ऐं हृद० अङ्गु० ह्रीं शिर० तर्ज० क्लीं शिखा० मध्य० चामुण्डायै नेत्रा० अनामि०। विश्वेकनिष्ठ० कव० ॐ अस्त्राय० करत०॥ ऐं नमः शिरसि ह्रीं नमो दक्षिनेत्रे क्लीं नमो वामनेत्रे चां नमो दक्षिकर्णे मुं नमो वामकर्णे डां नमो दक्षिणनासापुटे विं नमो मुखवृतेयै नमो वामनासापुटे चें नमो मूलधारे ॥ प्राणायामः॥ ध्यानं। ॐ खड्गं चक्रगदेषुचापरूलिशशूलं भुसण्डीशरां शङ्ख सन्दधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृतां वामस्तौत्मपिते हरौ कमलजौ हन्तुं मधुं कैटभं नीलश्मद्युतिपाददशकां सव्येमहाकालिकाम्॥

गायत्री ॐ बीज त्रयायै विद्महे तत्प्रचोदनायै धीमहि तन्नः शक्तिः प्रचोदयात् २॥मूलं। ॐ ह्रीं क्लीं चामुण्डायैविच्चे।१०८॥ मालां शि० प्राणा० न्यासं गुह्येति तर्पणं ॥ ॥ ॐ अस्य श्री भद्रकालीमन्त्रस्य च्यवनऋषिः अनुष्टुप्छ० श्रीभद्रकाली देवता भैं बी० हूं श० क्रीं की० आत्मनो जपे०। ऋष्यादि० ॐ अस्य श्री ललीश्वरी म० ब्र०ऋ० दिव्यंगा० छ० श्रीललीशवरी देवता ॐबीजं ह्रीं श० श्रीं की० आत्मनो० जपे०॥ ह्रामिति करषडङ्गः॥ प्राणा०।ध्यानं। ॐ पूर्वार्जितपुण्य फलेन देव्या तथैहिकनित्यमनोगतेश्च निर्वाणमार्गा सुगतंकृतंययाललीश्वरीतां प्रणमामिभुक्त्या ॥गायत्री। विद्युद्वर्णायै विद्महे त्रिलोचनायै धीमहि तन्नो ल० २॥ ॐ ह्रीं श्रीं ललीश्वर्यै नमः १०८। मालां शि० प्राणा० न्यासं पू० गुह्येति तर्पणं॥ ॐ अस्यश्री कुब्जिकाम० श्रीकण्वभैरवऋ० अनुष्टुप्छन्दः श्रीकुब्जिकादेवता ह्रीं बी० ह्रीं श० हूं की० आत्मनो जपे०। ऋष्यादि। ह्रां ह्रीं करषडङ्गः। प्राणा० ध्यानं। उदयादित्यसङ्काशंहिमकुन्देन्दुवरचशां यादृशीं भैरवीं रूपां तादृशीं कुब्जिकां स्मरेत् गायत्री। कुब्जिकायै विद्महे भैरवरूपायै धीमहि तन्नः कुब्जिका प्रचोदयात् २॥

ॐ मूलं। ॐ ह्रीं प्रीं कुब्जिके देवि ह्रीं ०।१०८॥ ॐ मूलं । ह्रीं हूं ह्रीं ह्रां श्रीं फ्रीं फ्फ्रीं अम्बिके स्वाहा १०८। मालां०, प्राणा०, पूर्ववन्न्या० गुह्येति तर्पणं अनेन म०॥ ॥ ॐ अस्य श्री महामारीमन्त्र० ब्रह्माऋषिः गायत्रीछन्दः महामारीदेवीदेवता ॐ बी० ह्रीं श० श्रीं की० नानारूपमहामारी सन्तोषणार्थं आत्मनो० महामारीनिवृत्यर्थं देशोपद्रवशान्त्यर्थं जपे विनियोगः॥ ऋष्यादिन्या० मूलेन करषडङ्गश्च, प्राणा०, ध्यानं ॐ येदेविदुर्दुरकृतान्त मुखान्तरस्था येकालिकालगणपाशनितान्तबद्धाः येचण्डिचण्ड गुरुकल्मषसिन्धुमग्नास्तान्पासिमोचयसि तारयसिस्मृतैव। महाबलेमहोत्साहेमहाभयविनाशने त्राहि मां देव दुष्प्रेक्षे शत्रूणां भयवर्धिनी ॥गायत्री ॐ नानारूपायै विद्महे माहेश्वर्यै धीमहि तन्नो महामाया प्रचोदयात् २ ॥मूलं ॐ ह्रीं श्रीं महामायै नानारूपाभगवत्यै नमः १०८॥ मालां शि० प्राणा० पूर्ववन्न्या० गुह्येति तर्पणं अनेन म० ॥ ॐ अस्य श्री महाविद्यामन्त्रस्य ईश्वरऋषिः पङ्क्तिश्छन्दः श्री अन्तर्यामीकिरातरूपो नारायणदे० अथवा महाविद्यां ईश्वरी दे० ॐ बी० स्वाहा श० क्लीं कील० अशेषमारीदोषनिवृत्यर्थं सर्वजगत्म्बास्कृप्राप्त्यर्थं जपे विनियोगः । ऋष्यादिकरषडङ्गः मूलेन॥

प्राणा० ध्यानं। यामायामधुकैटभप्रसथिनीति०॥ ॐ अरिशङ्खकृपाणखे०॥ गायत्री। ॐ कान्त्यायिन्यै विद्महे कन्यकुमार्यै धीमहि तन्नो महामाया प्रचोदयात् २ ॥ मूलं ॐ हां ह्रीं हां क्लीं श्रीं ब्लूं फ्रां आं ह्रीं क्रौं हूं फट् स्वाहा ।१०८॥ मालां शिर० प्राणायामः पूर्ववन्न्या० गुह्येति तर्पणं अनेन म०॥ ॥ ॐ अस्य श्री कातुवीर्यैर्ज्व नम० दत्तात्रेयऋषिः अनुष्टुप्छन्दः श्रीकातुवीर्यैर्जुनोदेवता आत्मनो० जपे विनियोगः। ऋष्यादिन्या०। प्रामिति करषडङ्गः। प्राणा०। ध्यानं। ॐ तद्युत्सूर्यसहस्त्रकान्तिरखिलक्षोणीधवैर्वन्दितो हस्तानां शतपञ्चकावतरोहरेः पायात्म्यन्दनगोरुणाभवसनः श्रीकातुवीर्योनृपः॥गायत्री कातुवीर्याय वि०

सहस्त्रबीहवे धी० तन्नो कुमारः प्रचोदयात् २॥ मूलं। ॐ प्रीं क्रीं क्लीं ब्रं आं श्रीं क्रीं ॐ हां हूं फट् कातुवीर्यार्जुनाय स्वाहा १०८॥ वर्णाः त० मालां शि० प्राणा० पूर्ववन्न्या० गुह्येति तर्पणं अनेन म०॥ ॐ अस्य श्री हनुमन्म० श्रीरामचन्द्रऋषिः अनुष्टुप्छन्दः श्रीहनुमान्देवता आत्मनो० जपे० ऋष्यादि ॐ ह्रीं श्रीं अङ्गु० हृद० हनुमते तर्ज० शिर० महावीर्यपराक्रमाय मध्य० शिखा० क्रौं सर्वकार्याणि अना० कव०

साधय २ नेत्र० कनि० हूंफट् स्वाहा अस्त्राय० करत० ॥ प्राणा० ध्यानं ॐ वातात्मजं वानरयुथमुख्य। ॐ मनोजवं मारुतवेगतुल्यं जितेन्द्रियं बुद्धिमतां वरिष्ठम् वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये॥ गायत्री॥ अञ्जनीयाय विद्महे पवनात्मजाय धीमहि तन्नो हनुमान्प्रचोदयात् २॥मूलं । ॐ ह्रीं श्रीं हनुमन्त्राय महावीर्यपराक्रमाय कां सर्वकार्याणि साधय हूं फट् स्वाहा १०८॥ मालां शि० प्राणा० तर्पणं॥ ॐ अस्य श्री हनुमन्मन्त्रस्य श्रीरामचन्द्रऋषिः अनुष्टुप्छन्दः श्रीहनुमान्देवता मारुतेरितिबीजं, अञ्जनीसूनुरितिशक्तिः आत्मनो० जपे विनियोगः। ऋष्यादि करषडङ्गन्यासः मूलेन। प्राणा०। ध्यानं। ॐ ध्यायेद्बालदिवकरद्युतिनिभं दैत्येन्द्रशत्रु तथा देवेन्द्रप्रमुखं प्रशस्तयशसं देदीप्यमानं दिवि सुग्रीवादिसमस्तवानरयुतं सर्व्यकुतर्क्यप्रियं सरम्भारुण लोचन पवनजं पीताम्बरालङ्कृतम् ॥ गायत्री। अञ्जनीयाय विद्महे श्रीरामदूताय धीमहि तन्नो हनुमान्प्रचोदयात् २॥ मूलं ॥ ॐ ॐ ह्रीं हनुमते रामदूताय लङ्काविध्वंसनाय अञ्जनीगर्भसम्भूताय शाकिनी डाकिनी राकिनी विध्वंसनाय किलिकिलि ववकार

णविभीषणाय हनुमते देवाय ॐ ह्रीं श्रीं ह्रां ह्रां फट् स्वाहा १०८। मालां शि० प्राणाया० पूर्ववन्न्यासं गुह्येति तर्पणं अनेनम०॥ ॐ अस्य श्री शीतलामन्त्रस्य वामदेवऋषिः उष्णिक् छन्दः शीतलादेवता ह्रीं बीजं श्रीं शक्तिः नमः कीलकं आत्मनो० जपे विनियोगः॥ ऋष्यादि । ह्रां श्रां इति करषडङ्गन्यासः प्राणाया० ध्यानं । ॐ नमामि शीतलां देवीं रासभस्तां दिगम्बराम् मार्जनीकर्णशोपीतां शूर्पालङ्कृतमस्तकाम् ॥गायत्री॥ ॐ शीतलायै विद्महे जगद्वन्द्यायै धीमहि तन्नः शीतला प्रचोदयात् २ ॥ ॐ ह्रीं श्रीं शीतले स्फोटकं नाशय २ वातं श्छेदय २ दाहं स्तम्भय २ ॐ ह्रीं श्रीं शीतलायै स्वाहा १०८॥ मालां शि० प्राणा० पूर्ववन्न्या० गुह्येति तर्पणम्॥ ॐ अस्य श्री पुरुप्रदकृष्णमन्त्रस्य ब्रह्माऋषिः अनुष्टुप् छन्दः सुतप्रदकृष्णो देवता आत्मनो० जपे विनियोगः पुत्रप्रदप्यभीष्टशिद्धिर्थं जपे०॥ ऋष्यादि०। देवकीसुतगोविन्द ह्० अङ्गु० वासुदेवजगत्पते तर्ज० शिर० देहिमेतनयं कृष्ण मध्य० शिखा०। देवकीसुतगोविन्द अना० कव० वासु

देवजगत्पते नेत्रा० कनि० देहिमेतनयंकृष्ण अस्त्रा० करत०॥ प्राणाया०। ध्यानं। ॐ विजयेतियुतोरथस्थतः प्रजमानीय समुद्रमध्यगः प्रदधातुनयं द्विजन्मने स्मरणे यो वसुदेवनन्दनः। देवकीसुताय विद्महे जगत्पतये धीमहि तन्नः पुत्रप्रदकृष्ण प्रचोदयात् २। मूलं ॐ देवकीसुत गोविन्द वासुदेवजगत्पते देहि मे तनयं कृष्ण त्र्यामहं शरणं गतः१०८॥ मालां शि० प्राणा० पूर्ववन्न्या० गुह्येति तर्पणम् ॥ ॐ अस्य श्री महालक्ष्मी मन्त्रराजस्य ब्रह्माऋषिः गायत्री छन्दः श्रीमहालक्ष्मीदेवता महालक्ष्मीसिद्धये जपे विनियोगः। ॐ एं हृद० अङ्गु० ॐ ह्रीं शिर० तर्ज० ॐ श्रीं शिखा० मध्य० ॐ क्लीं कव० अना० ॐ ह्सौः नेत्रा० कनि० ॐ जगत्प्रसूत्यै नमः अस्त्रा० करत०॥ ॐ प्राणाया०। ध्यानं॥ ॐ बालात्कद्युविमिन्दुखण्डविलत्कोटीरफारोज्वलां रत्नाकल्पविभूषितां कुचनतां शालिकरैर्मञ्जरीम् पद्मं कौस्तभरत्नमप्यविरतंसंविभ्रतीं सस्मितां फूलाम्भोजविलोचन त्रयतुतां ध्यायेत्पुरामम्बिकाम्॥ गायत्री। परात्मिकायै वि०

ॐ अस्य श्री ध्रुवम० नारदऋ० जगतीश्छ० ध्रुवोदे० जपे ह्रामिति करषडङ्गः प्राणा० ध्यानं ॐ ऋषिप्रवेरं।गायत्री ॐ और्तानपादात्मजाय विद्महे तारापतये धीमहि तन्नो ध्रुवः प्रचोदयात् २मूलं । ॐ ह्रीं और्तानपादात्मयध्रुवाय स्वाहा १०८। ॐ ध्रं ध्रुवाय स्वाहा १०८ द्वितीयमन्त्रः। प्राणा० न्यासं तर्पणम्॥ ॐ अगस्त्यमन्त्रस्य देवलऋषिः त्रिष्टुप्छन्दः अगस्त्योदेवता जपे० ह्रामिति न्यासः प्राणा० ध्यानं ॐ दिवाकरापत्य० गायत्री मूलं ॐ अवर्णपादात्मजाय अगस्त्यायनमः १०८। ॐ अं अगस्त्यायनमः १०८ द्वितीयमन्त्रः मालां शि० प्राणा० न्यासं तर्पणम्॥ ॐ अस्य श्री नटराजभैरवमन्त्रस्य ब्रह्माऋषिः दिव्यंगायत्रीश्छन्दः श्रीनटराजभैरवो देवता ॐ बीजं ह्रीं शक्तिः नमः कीलकं आत्मनो० जपे विनियोगः ऋष्यादि ह्रामिति करषडङ्गः प्राणा० ध्यानं ॐ विचित्रवर्णैरभिशोभिताङ्गैनटाभिधोभैरवर्यपूजितः पद्मापुरान्तः कृतनित्यवासः पातत्मनोभकुभभयापहरकः॥

गायत्री । विचित्रवर्णाय विद्महे नाद्याप्रियाय धीमहि तन्नो नटीश्वरः प्रचोदयात् २॥ मूलं । ॐ ह्रीं नटराजभैरवाय नमः१०८॥मालां शि० प्राणा० न्यासं तर्पणम् ॥ ॐ अस्य श्री नन्दिकेश्वरम० ब्रह्माऋ० गायत्रंछ० नन्दिकेश्वरो देवता जपे वि० मूलेन करषडङ्गन्यासः प्राणायामं ॥ ध्यानम् ॐ नन्दिनं कालसूर्याभं चतुर्बाहुं त्रिलोचनम् वज्रं मुण्डं त्रिशूलं च हृक्षसूत्रधरं भजे॥ गायत्री नन्दिरुद्राय विद्महे नन्दिकेश्वराय धीमहि तन्नो नन्दी प्रचोदयात् २ । मूलम् ॐ ह्रीं श्रीं ह्रां नन्दिकेश्वराय नमः १०८॥ मालां शिरसि प्राणाया० पूर्ववन्न्यासं गुह्येति तर्पणं अनेन म० ॥ ॥

ॐ अस्य श्री शनश्चरमन्त्रस्य कुत्सऋषिः गा० छ० , शनश्चरो देवता जपे० । यां, यीं यूं यैं यौं यः करषडङ्गः प्राणा० ध्यानं कलशाक्षस्त्रगन्वीतो नरस्थश्च त्रिलोनः दण्डपाशधरः कृष्णः शनिस्सर्वभयङ्करः ॥ गा० सूर्यपुत्रायवि० २। मू० ॐ ह्रीं कृष्णवर्णशनैश्चराय नमः १०८ । मालां० प्राणा० तर्पणम् ॥ ॐ अस्य श्री राहुर्मन्त्रस्य गौतमऋषिः गा० छ० राहुदेवता जपे०।शां शीं शूं शैं शौं शः करषडङ्गः । प्राणा० ध्यानं शीर्षाकृतिस्तुवैराहुः स्त्रग्वीकुण्डलभूषितः सिंहासनगतः पायदमृता हरणप्रितः॥गा सैंहिकेयाय वि० २। मू० ॐ ह्रीं अमृतप्रियाय नमः १०८। मालां शि० प्राणा० पूर्ववन्न्या० गुह्येति तर्पणम्॥ ॐ अस्य श्री केतुर्म० अङ्गिरसऋ० गा० छ० केतुदेवता जपे०। क्षां क्षीं क्षूं क्षैं क्षौं क्षः , करषडङ्गः॥ प्राणा० ध्यानं भुजङ्गमैस्तुदशभिर्दुक्तो क्षकलशान्वितः केतुस्त्र्यक्षो महाकायोवातान्नासोतसश्छविः॥ अग्निपुत्राय वि० २॥ मू० । ॐ ह्रीं ज्योतिष्केतवे नमः १०८। मालां० प्राणा० पूर्ववन्न्या० गुह्येति तर्पणम्॥